# Jadavpur University
# M.A. Admission Test in Sanskrit, 2018

**Time: 2 Hours** **Full Marks: 50**

**PART- I (Seen)**

षष्ठं विहाय सर्वे प्रश्नाः देवभाषया देवनागर्या समाधेयाः। सर्वत्र अधःप्रदत्तेभ्यो विकल्पेभ्यो यथायथम् उत्तरम् आदाय पूर्णवाक्यनिर्माणपुरःसरं समाधानं कर्तव्यम्।

१। अभिज्ञानशाकुन्तलम् [1X4=4]

क) 'आ परितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम्'– कस्योक्तिरियम्?

विदूषकस्य, दुष्यन्तस्य, सूतस्य, सूत्रधारस्य।

ख) 'इदानीमेव दुहितरं शकुन्तलामतिथिसत्काराय संदिश्य दैवमस्याः प्रतिकुलं शमयितुं सोमतीर्थं गतः'– कः सोमतीर्थं गतः?

विश्वामित्रः, वैखानसः, कुलपतिः, शारद्वतः।

ग) अधोलिखितयुग्मेभ्यः समीचीनं पदजातं परस्परं योजनीयम्।

अ) पुरः प्रतिहतं शैले
आ) अभिजनवतो भर्तुः
इ) तच्चेतसा स्मरति
ई) गच्छति पुरः शरीरं
उ) श्लाघ्ये स्थिता गृहिणीपदे
ऊ) धावति पश्चादसंस्थितं चेतः
ऋ) स्रोतः स्रोतोवहो यथा
ॠ) नूनमबोधपूर्वम्

घ) 'सदृशमेतत् पुरुवंशप्रदीपस्य भवतः'– क आह?

कण्वः, वैखानसः, शारद्वतः, शार्ङ्गरवः।

२। कारकसमासौ [1X8=8]

क) यतो वा इमानि भूतानि जायन्ते। अत्र अधोरेखाङ्कितपदस्य कारकनिरूपणाय कस्य पाणिनीयसूत्रस्योपयोगः स्यात्?

भुवः प्रभवः, जनिकर्तुः प्रकृतिः, विभाषा गुणेऽस्त्रियाम्, अपादाने पञ्चमी।

ख) परित्राणाय साधूनां...संभवामि युगे युगे। अत्र अधोरेखाङ्कितपदस्य कारकनिरूपणाय कस्य पाणिनीयसूत्रस्योपयोगः स्यात्?

साधकतमं करणम्, कर्तृकर्मणोः कृति, कर्तुरीप्सिततमं कर्म, क्तस्य च वर्तमाने।

ग) स एवायं ......................... तेऽद्य योगः प्रोक्तः पुरातनः।

अहं, मयि, मह्यं, मया।

घ) शिक्षकः............प्रश्नं पृच्छति।

छात्रे, छात्राय, छात्रात्, छात्रं।

ङ) उपगिरम्– इत्यत्र कः समासः?

षष्ठी तत्पुरुषः, अव्ययीभावः, प्रादितत्पुरुषः, कर्मधारयः।

च) अष्टाध्यायी– अस्य किं विग्रहवाक्यम्?

अष्टौ अध्यायाः, अष्टानाम् अध्यायानां समाहारः, अष्टमः अध्यायः, अष्टौ अध्यायाः यस्याः सा।

छ) प्राचार्यः– इत्यत्र कः समासः?

गतितत्पुरुषः, अव्ययीभावः, बहुव्रीहिः, प्रादितत्पुरुषः।

ज) कदन्नम्– इत्यत्र कः समासः?

कर्मधारयः, कुतत्पुरुषः, अव्ययीभावः, बहुव्रीहिः।

३। <u>तर्कसंग्रहः</u>

[1X3=3]

क) तर्कसंग्रहमते रसाः–

चत्वारः, पञ्च, षट्, सप्त।

ख) आद्यपतनासमवायिकारणं–

द्रवत्वम्, गुरुत्वम्, परत्वम्, पृथक्त्वम्।

ग) एकत्वं—

नित्यम्, अनित्यम्, नित्यमनित्यं च, न नित्यं नाप्यनित्यम्।

४। <u>अग्निसूक्तम् (१.१)</u>

[1X3=3]

क) .................................. 'उप त्वाग्ने' इत्यादिकस्तृचः विनियुज्यते।

द्वितीयस्यां पवमानेष्टौ, प्रातरनुवाक आग्नेये क्रतौ, अग्नीषोम–प्रणयणे, आधाने तृतीयेष्टौ।

ख) 'विश्वतः परिभूरसि' इति पादगतस्य 'असि' इति पदस्य पदपाठे स्वरो भवति–

अ॒सि॒, अ॑सि, असि॑, असि।

ग) गार्ग्यस्य मतेऽग्निशब्दः–

अगि–धातोरुत्पन्नः, इ–धातोरुत्पन्नः, अखण्ड–प्रातिपदिकम्, अक्नोपन–शब्दाद् जायते।

५। <u>मनुसंहिता (सप्तमोऽध्यायः)</u> **[1X3=3]**

क) मनुः कस्मात् राज्यं प्राप्तवान्?

विजयात्, विनयात्, उत्तराधिकारवशात्, अलोभात्।

ख) क्रोधजो गणः.......................।

दशकः, नवकः, अष्टकः, सप्तकः।

ग) कीदृशं दण्डमसृजदीश्वरः?

क्षात्रतेजोमयम्, ब्रह्मतेजोमयम्, रुद्रतेजोमयम्, भयानकम् ।

६। **<u>History of Classical and Technical Sanskrit Literature</u>** **[1X7=7]**

**Answer in full sentence in English:**

a) Who wrote the *Saundarananda*?
   Bhāsa, Aśvaghoṣa, Buddhaghoṣa, Bhavabhūti.

b) How many acts are there in Kālidāsa's *Vikramorvaśīya*?
   Five, Six, Seven, Eight.

c) Who was the author of the *Bṛhatsaṁhitā*?
   Āryabhaṭa, Varāhamihira, Guṇāḍhya, Brahmagupta.

d) Allahabad Pillar Inscription is ascribed to—
   Hariṣeṇa, Samudragupta, Candragupta II, Aśvaghoṣa.

e) Who among the following are the hero and heroine of *Naiṣadhacarita*?
   Udayana-Vāsavadattā, Nala-Damayantī, Cārudatta-Vasantasenā, Puṇḍarīka-Mahāśvetā.

f) Who composed *Pārśvābhyudaya*?
   Rūpa-gosvāmin, Merutuṅga, Jinasena, Dhoyi.

g) Which of the following is ascribed to Diṅnāga?
   *Nyāyabhāṣya, Yuktidīpikā, Pramāṇasamuccaya, Jātakamālā.*

७। साहित्यदर्पणः (षष्ठपरिच्छेदः) [1X4=4]

क) वीररसः कीदृशे रूपके प्रधानरसरूपेण प्र युज्यते–

भाणे, समवकारे, नाटके, डिमे।

ख) साहित्यदर्पणस्य कः प्रणेता?

मम्मटः, विश्वनाथः, दण्डी, राजशेखरः।

ग) नाटकादिषु प्रथमः सन्धिः–

बिन्दु–, प्रतिमुख–, मुख–, विष्कम्भक–।

घ) अर्थप्रकृतिषु अस्ति–

प्रतिमुखम्, पताका, गर्भः, प्रवेशकः।

८। ईशोपनिषद् [1X3=3]

क) के जनाः प्रेत्य असूर्यनामकं लोकं गच्छति?

दुःखिनः जनाः, दुष्टाः जनाः, आत्महनो जनाः, असुराः।

ख) मातरिश्वा किं दधति?

अपः, आकाशम्, पृथिवीम्, परमात्मानम्।

ग) हिरण्मयेन पात्रेण कस्य मुखम् आवृतम्?

सूर्यस्य, मन्दिरस्य, सत्यस्य, चन्द्रस्य।

## PART II (Unseen)

९। देवभाषायां भाषान्तरं कार्यम्।

a) It is the same Lord who dwells in the sum and the part, in the Cosmos as a whole and in each being, force or object in the Cosmos. [2X2.5=5]

b) Mind has two states: one is scattered state; the other is the gathered state. In all *yoga* teaching, you speak of a gathered state: gather all this energy.

१०। अधोलिखितेषु विषयेषु एकम् अवलम्ब्य वाक्यपञ्चकेन अनुच्छेदो वि रच्यताम्।

क) विषण्णता। [5]

ख) तथ्याधिकारनीतिः।

ग) बाल्यबन्धुः।

११। अनुच्छेदं पठित्वा अधःप्रदत्तानां प्रश्नानां समाधानं देवभाषया क्रियताम्। [1X5=5]

राजोवाच

स्वधामानुगते कृष्णे यदुवंशविभूषणे।
कस्य वंशोऽभवत्पृथ्व्यामेतदाचक्ष्व मे मुने।।

श्रीशुक उवाच

योऽन्त्यः पुरञ्जयो नाम भाव्यो बार्हद्रथो नृप।
तस्यामात्यस्तु शुनको हत्वा स्वामिनमात्मजम्।।

प्रद्योतसंज्ञं राजानं कर्ता यत्पालकः सुतः।
विशाखयूपस्तत्पुत्रो भविता राजकस्ततः।।

नन्दिवर्धनस्तत्पुत्रः पञ्च प्रद्योतना इमे।
अष्टात्रिंशोत्तरशतं भोक्ष्यन्ति पृथिवीं नृपाः।।

शिशुनागस्ततो भाव्यः काकवर्णस्तु तत्सुतः।
क्षेमधर्मा तस्य सुतः क्षेत्रज्ञः क्षेमधर्मजः।।

विधिसारः सुतस्तस्याजातशत्रुर्भविष्यति।
दर्भकस्तत्सुतो भावी दर्भकस्याजयः स्मृतः।।

नन्दिवर्धन आजेयो महानन्दिः सुतस्ततः।
शिशुनागा दशैवैते षष्ठ्युत्तरशतत्रयम्।।

समा भोक्ष्यन्ति पृथिवीं कुरुश्रेष्ठ कलौ नृपाः।
महानन्दिसुतो राजन् शुद्रीगर्भोद्भवो बली।।

महापद्मपतिः कश्चिन्नन्दः क्षत्रविनाशकृत्।
ततो नृपा भविष्यन्ति शुद्रप्रायास्त्वधार्मिकाः।।

स एकच्छत्रां पृथिवीमनुल्लङ्घितशासनः।
शासिष्यति महापद्मो द्वितीय इव भार्गवः।।

**प्रश्नाः**

१) कयोः संवादोऽयम्?

२) क आसीत् मूलप्रश्नः?

३) काकवर्णः कस्य सुतः?

४) कोऽत्र 'कुरुश्रेष्ठ' इत्युक्तः?

५) का आसीत् महापद्मस्य माता?

*******